Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 6 | ISSN : 2581- 6306

# अभिलेखेषु काव्यतत्त्वानुशीलनम्

Sourav Das
Research scholar, Department of Vyakarana, National Sanskrit University, Tirupati, India

**सारांश**: – लेखनरीतिः कदा आरभ्य प्रारब्धा तस्याः सुस्पष्टकालनिर्णयविषये पण्डितेषु मतवैविध्यं दरीदृश्यते। केषाञ्चनानां मते वैदिककालादभ्य एव लेखनरीतिः प्रचलिता आसीत्। वस्तुतः कथं लेखनरीतिः प्रारब्धा इत्युक्ते विषयस्य संरक्षणमेव तत्र मुख्यकारणम्। अशोकस्य कालादारभ्य आद्यवधिः सा रीतिः निरविच्छिन्ना। प्राचीनाभिलेखः न केवलं ऐतिहासिकतथ्यं राज्ञां कालकुलादिविषयं च समर्पयति अपि तु तेषां विश्लेषणे साहित्यतत्त्वमण्डितसहृदयहृदयाह्लादजनकतथ्यमपि निःसरति। तेषामभिलेखानां पर्यालोचनेन काव्यतत्त्वं उपस्थाप्यते अस्मिन् शोधलेखे।

**विशेषशब्दः** – अभिलेखः, अशोकादिराजानां प्रशस्तिः, साहित्यिकतत्त्वपर्यालोचनम्, रसादिविचारः।

---

साम्प्रतिककाले तथस्य संरक्षणं, प्रसारम् अन्तर्जालमाध्यमेन यथा झटिति सम्भवति तथैव प्राचीनकाले एव तथस्य संरक्षणं, प्रसारं अभिलेखमाध्यमेन आसीत्। किन्तु लेखनरीतिः कदा प्रारब्धा तस्याः सुस्पष्टकालनिर्धारणं क्लिष्टकर्म एव। सिन्धुसभ्यताकाले यद्यपि लेखनरीतिः प्रारब्धा किन्तु चित्रयुतलेखनस्य अद्यावधिः पाठोद्धारमसम्भवमेव। तथैव सुमेरीयसभ्यता अपि। वेदस्य श्रुतिमूलकत्वं सुस्पष्टमेव किन्तु अनेकेषां नये तदा आरभ्य एव लेखनशैली प्रचलिता आसीत्। ऋग्वेदस्य **आरिख**[1] इति पदं आलेखस्य लिपेः वा पर्यायोऽस्ति। अत्र नारदस्मृतेः एकः श्लोकः प्रस्तूयते, यत्र वर्णितमस्ति यत् भगवता ब्रह्मणा लेखनक्रियायाः विकासः संजातः –

**ना करिष्यति यदि ब्रह्मा लिखितं चक्षुरुत्तमम्।**
**तदेयमस्य लोकस्य नाभविष्यत् शुभां गतिः।।**

पाणिनेः कालेऽपि लेखनिक्रिया आसीत्, लिखँ – अक्षरविन्यासे इत्यस्मात् धातोः तत् ज्ञायते। अपि च महाभाष्येऽपि वैदिककाले लेखनक्रिया प्रचलिता आसीत् तस्य प्रमाणं लभ्यते अनेन –

**उत त्वः पश्यन्न ददर्श वाचम् उत त्वः शृण्वन्न शृणोत्येनाम्।**
**उत त्वस्मै तन्वं वसस्रे जयेव पत्य उशती सुवासा।।**[2]

1 ऋग्वेदः – 6.53.7
2 महा. भा – पश्पशा – पृ. 51

शब्दस्य श्रुतियोग्यत्वं प्रसिद्धं किन्तु **पश्यन्न ददर्श वाचम्** इत्युक्ते शब्दस्य दर्शनयोग्यताऽभाव: सर्वजनविदित: अत: लिखितस्य अक्षरस्यैव दर्शनं सम्भवति। तेन तस्मिन्कालेऽपि लेखनमासीदिति ज्ञायते।

बृहस्पतिस्मृते: वक्तव्यमस्ति यत् सृष्ट्यारम्भे ब्रह्मणा एव पत्रेषु अक्षराङ्कनेन लेखनक्रियाया: विकास: कृत:। ऋषभनाथस्य पुत्री "बम्पी" इति नामानुसारेण ब्राह्मी लिपि: प्रतिपादिता। अपि च विविधस्मृतिग्रन्थेष्वपि लेखनक्रियासंकेत: सुस्पष्ट: एव। यथा –

1. **लिखितं लिखितेनैव**......[3]
2. **लेखस्य पृष्ठेऽभिलिखेद्**....[4]
3. **लेखयित्वा च संपूज्य**....[5]

क्रीर्तिप्रिया: राजान: स्वकीर्तिं प्रसारयितुं ज्ञापयितुं च बहुविधा प्रचेष्टा कृता। ते राजान: स्वकीर्तिं शिलालेखे, ताम्रलेखे, लौहस्तम्भलेखे, मन्दिरस्य गात्रे एवं बहुविधस्थलेषु लेखितवन्त:। तत्तल्लेखनेन न केवलं कालनिर्णय: अपि तु सामाजिकार्थनैतिक-शासनादिविषयेऽपि सुस्पष्टधारणा समुपलभ्यते। यद्यपि अभिलेख इत्युक्ते देवानांप्रिय-अशोकस्य शिलालेखात् एव कालनिर्धारण: सुप्रसिद्ध: किन्तु तस्य पूर्वमपि अभिलेख: आसीदेव। संस्कृतभाषा आसीत् किन्तु लोकप्रसिद्धभाषारूपे तदानीन्तनकाले पाली अथवा प्राकृत् एव सुप्रसिद्धा।

अभिलेखेषु शिलालेख:-लघुशिलालेख - स्तम्भलेख-गुहालेख-ताम्रलेखादीनां गणना भवति। तेषु अभिलेखेषु अशोकस्य, मौर्योत्तरकालस्य, गुप्तकालस्य, गुप्तोत्तरकालस्य च अभिलेखा: प्रमुखा: तात्पर्यग्राहका: सन्ति।

अभिलेखा: न केवलं कालवाचका: ऐतिहासिकतथ्यसमन्वता: अपि तु साहित्यशास्त्रस्य प्रतिबिम्बस्वरूपा:। कालक्रमाणुसारेण तासामभिलेखानां परिचय: अपि च साहित्यशास्त्रदृष्ट्या तासां परिचय: क्रमश: आलोच्यते।

अशोकस्य चतुर्दशाधिका: शिलालेखा: वर्तन्ते। एतेषां शिलालेखानां काल: 270-232 ई.पू. एव। एतेषां शिलालेखानां विषया: भवन्ति अहिंसा, धर्मप्रचार:, जनकल्यानं, दानं, समाजसेवा, मितव्ययिता इति। भाषा प्राकृतम्(पालि:)। प्रथमशिलालेख: एवं भवति – **"इयं धम्मलिपी देवानंप्रियेन प्रियदसिना राञा लेखापिता। इध न कं चि जीवं आरभित्पा प्रजूहितव्यं। न च समाजो कतव्यो। बहुकं हो दोसं समाजम्हि पसति देवानांप्रियो प्रयदसि राजा।.......**" प्राय: चतुर्दशेषु सर्वेषु शिलालेखेषु एषा एव लेखनशैली दृष्टा। अर्थात् भाषा सरला सर्वजनविदिता, न कुत्रापि दीर्घसमासयुतं वाक्यं दृश्यते। प्रसादगुणस्य प्राधान्यं दृश्यते एतेषु शिलालेखेषु। प्रसादगुणस्य लक्षणं काव्यप्रकाशे प्रोक्तम् – **शैथिल्यं प्रसाद:**[6] इति

एवमेव अशोकस्य बहव: स्तम्भलेखा: सन्ति। एतेषां स्तम्भलेखानां भाषा प्राकृतमिति, लिपि: ब्राह्मी, काल: 270-232 ई.पू.। एतेषां स्तम्भलेखानां धर्मशिक्षा, महिमा, धर्मतत्त्वविवेचना, सम्यक्दृष्टि: आत्मावलोकनम् वा, उच्चाधिकारिणां कर्मचारिणामधिकार: कर्तव्यश्च इत्यादय: विषया: सन्ति। साहित्यकदृष्ट्या पर्यालोच्यते चेत् एतेषां स्तम्भलेखानां भाषा अतीव सरला। वस्तुत: प्राकृतभाषायां कदाचित् संस्कृतप्रभावितप्राकृतभाषायां विरचिता: स्तम्भलेखा:। यथा अशोकस्य

3 नारदस्मृति 2.122

4 याज्ञवल्क्यस्मृति: - 2.95

5 कपिलस्मृति: -325

6 का. प्र – अष्ट. उ.

तृतीयस्तम्भलेखः यत् देहलीनगरे लभ्यते – **देवानं प्रिये पियदसि लाज हेवं हा। कयानं मेव देखति इयं मे। कयाने कटे ति। नो मिन पापं देखति इयं मे पापे कटेति इयं वा आसिनवे। नामाति। दुपटिवेखे चु खो एसा। हेवं चु खो एस देखिए। इमानि।** सामान्यजनाः अपि यथा अवगच्छन्ति। तेन दीर्घसमाससम्पन्नवाक्यं नास्त्येव। सरलागद्यशैल्या एते विरचिताः। अशोकोत्तरकाले तु गद्यशैली स्यादेव किन्तु श्लोकरूपेणापि दृश्यते।

**कनिष्कस्य सारनाथबौद्धप्रतिमालेखः**

कनिष्कस्य सारनाथबौद्धप्रतिमालेखः संस्कृतप्रभावितप्रकृतभाषां विरचितः। लोकहितसुखाय भिक्षुबलैः भगवतः बोधिसत्त्वस्य यष्टि–छत्रयोः स्थापना इति विषयमाधारीकृत्य अयं शिलालेखः। अस्य शिलालेखस्य शैली अतीवसरला। लेखनशैल्यां प्रसादगुणस्य प्राधान्यं दृश्यते।

**रुद्रदाम्नः गिरनारशिलालेखः**

रुद्रदाम्नः गिरनारशिलालेखः सस्मूर्णरूपेण संस्कृभाषायां समुपलभ्यते। अस्य शिलालेखस्य कालः 150 ई.। सुदर्शनतडाकस्य इतिवृत्तं, पुनर्निर्माणं, रुद्रदाम्नः राजनैतिकोपलब्धिश्च अस्य शिलालेखस्य विषयः। अस्मिन् शिलालेखे दीर्घसमासयुतपदं दरीदृश्यते। पठनेनानेन बाणभट्टस्य शैली मानसपटे आगच्छति। यथा – **यथावत्प्राप्तौर्बलिशुल्कभागैः कनकरजतवज्रवैडुर्यरत्नोपचय-विष्यन्दमानकोशेन स्फुटलघुमधुरचित्रकान्तशब्दसमयोदारालंकृतगद्यपद्यप्रवीणेन प्रमाण-मानोन्मान्सवरगतिवर्णसारसत्त्वादिभिः परमलक्षणव्यंजनैरुपेतकान्तमूर्त्तिना स्वयमधिगत-महाक्षत्रपनाम्ना नरेन्द्रकन्या-स्वयंवरानेकमान्यप्राप्तदाम्न**...[7] इति दीर्घसमासवद्धत्वात् ओजगुणः परिलक्षितः। लक्षणं हि **गाढवन्धत्वमोजः**[8] इति।

**खारवेलस्य हाथीगुम्फाऽभिलेखः**

खारवेलस्य हाथीगुम्फाऽभिलेखे कलिङ्गनरेशस्य खारवेलस्य जीवनवृत्तान्तं, उपलब्धिश्च वर्तते। भाषा संस्कृतप्रभावितप्राकृतम्। सरलभाषायां प्रतिपादितः विषयः एवम् – **कलिंगराजवंसे परुसयुगे महाराजाभिसेचनं पापुनाति। अभिसितमतो च पधमे वसे वात-विहत-गोपुर-पाकार-निवेसनं परिसंख्यारयति कलिंगनगरि खिबीरं।**[9] लेखनशैल्यां प्रसादगुणस्य प्राधान्यं दृश्यते।

**समुद्रगुप्तस्य प्रयागशिलालेखः**

समुद्रगुप्तस्य प्रयागशिलालेखे समुद्रगुप्तस्य जीवनम्, उपलब्धिश्च वर्णितः। लिच्छविवंशभूतस्य[10] समुद्रगुप्तस्यास्य शिलालेखस्य ऐतिहासिकदृष्ट्या अस्य शिलालेखस्य गाम्भीर्यं तु वर्तते। दीर्घसमासयुतेऽस्मिन् शिलालेखे समसामयिकभौगलिकस्थितिरपि ज्ञायते। समकालिकाः राजनः तेषां स्थितिश्चापि। लेखनशैल्याम् ओजगुणस्य प्रधान्यं वैधर्वीरीतिश्च दरीदृश्यते।

---

7 रुद्रदाम्नः गिरनार–शिलालेखः

8 का. प्र. – अष्ट. उ

9 खारवेलस्य हातिगुम्फाशिलालेखः

10 लिच्छविदौहित्रस्य महादेव्यां कुमारदेव्यामुत्पन्नस्य महाराजाधिराज–श्रीसमुद्रगुप्तस्य सर्वपृथिवीविजयजनितोदयव्याप्तनिखिलावनितलां कीर्तिं....

एवमेव चन्द्रगुप्तस्य मथुराशिलालेखः, चन्द्रगुप्तस्य मेहरौलीशिलालेखः, कुमारगुप्तस्य विलसडस्तम्भलेखः एवं दामोदरपुरताम्रपत्रलेखः अपि उल्लेखयोग्याः। चन्द्रगुप्तस्य मथुराशिलालेखे शिवलिङ्गेषु शैवाचार्येषु च चन्द्रगुप्तस्य आस्था, मेहरौलीलौहस्तम्भलेखे चन्द्रगुप्तस्य धार्मिकोपलब्धिः, कुमारगुप्तस्य ताम्रपत्रलेखे राजनैतिकभूमिदानं एव मुख्यः विषयः। एते शिलालेखाः संस्कृतभाषायां वा संस्कृतप्रभावितप्राकृत्भाषायां गद्यशैल्यां च वर्तते।

पूर्वं ये तावत् शिलालेखाः स्तम्भलेखाः, ताम्रपत्रलेखाः, लौहस्तम्भलेखाः चर्चिताः तत्र लेखनशैली गद्यरूपा। राजप्रशस्त्यादयः एव मुख्यविषयस्तत्र। किन्तु 455-457 ई. परं शिलालेखादिषु काव्यशैली अधिकाधिकरूपेण दरीदृश्यते। एतेषु श्लोकेषु राजप्रशस्तिः, देवार्चनम्, राज्यवृत्तं, दानवृत्तिश्च इत्यादयः विषयाः लिखिताः। तत्रादौ –

**स्कन्दगुप्तस्य गिरनार-शिलालेखः**

अस्मिन् शिलालेखे विवरणात्मिका राजप्रशस्तिः वर्णितः। अस्मिन् शिलालेखे संस्कृतभाषायाम् अष्टत्रिंशच्छलोकाः सन्ति। सुदर्शनतडाकस्य संस्कारः अस्य शिलालेखस्य मुख्यविषयः लक्ष्मीवाचकपदेन अयं शिलालेखः प्रारब्धः। **श्रियमभिमतभोग्यां लैककालापनीयं त्रिदशपतिसुखार्थं यो बलेराजहारः।**[11] आदौ कतिपयेषु श्लोकेषु स्कन्दगुप्तस्य प्रशस्थिः वर्णिता। यथा –

**नृपतिगुणनिकेतः स्कन्दगुप्तः पृथुश्री**
**चतुरुदधिजलान्तां स्फीतपर्यन्तदेशाम्।**
**अवनिमवनतारिर्यः चकारात्मसंस्थां**
**पितरिसुरसखित्वं प्राप्तवत्यात्मशक्तया॥**[12]

पृथुश्री (पृथीव्याशोभावर्धनकारी) नृपतिगुणनिकेतः (सकलगुणसमन्वतः) अवनिमवनतारिर्यः स्कन्दगुप्तः प्राप्तवत्यात्मशक्तया पितरिसुरसखित्वं आत्मसंस्थां चतुरुदधिजलान्तां स्फीतपर्यन्तदेशां चकार इति सरलार्थः। अस्मिन् मालिनीछन्दसा विरचितः अयं श्लोकः। तस्य लक्षणं हि – **ननमयययुतेयं मालिनी भोगिलोकैः** इति। तदनन्तरं सुदर्शनतडागस्य वृत्तान्तः, तस्य संस्कारकार्यविषये वर्णितः वर्तते। यथा –

**अवेक्ष्य वर्षागमजं महोद्भ्रमं महोदधेषरूर्जयता प्रयेप्सुना।**
**अनेकतीरान्तजपुष्पशोभितो नदीमयो हस्त इव प्रसारितः॥**[13]

अस्मिन् श्लोके उपमालङ्कारः वर्तते। **उपमानोपमेययोरेव न तु कार्यकारणादिकयोः साधर्म्यं भवतीति तयोरेव समानेन धर्मेण सम्बन्धः उपमा।**[14] उपजातिः छन्दः वर्तते। तस्य लक्षणं भवति **"अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः"**[15] इति।

---

11 गिरनारशिलालेखः – 1 श्लोकः

12 गिरनारशिलालेखः – 3 श्लोकः

13 गिरनारशिलालेखः – 29 श्लोकः

14 का.प्र – दशमोल्लासः

15 छन्द.म – द्वितीयः स्तवकः – पृ – 30

**स्कन्दगुप्तस्य इन्दौरताम्रपत्राभिलेखः**

स्कन्दगुप्तस्य **इन्दौरताम्रपत्रा**भिलेखे देवविष्णुब्राह्मणेन इन्द्रपुरे सूर्य–मन्दिराय अक्षयनीवीदानवर्णनम् दृश्यते। अस्मिन् गद्यपद्यमयमिश्रतः अयं ताम्रलेखः। तस्य मूलपाठः एवं –

**यं विप्रा विधिवत्प्रबुद्धमनसो ध्यनैकताना स्तुवः।**

**यस्यान्तं त्रिदशासुरा न विविदुर्न्नोर्ध्वं न तिर्यग्गतिम्।।**[16]

उपजातिछन्दसा विरचितेऽस्मिन् श्लोके सूर्यदेवस्यस्तुतिः वर्तते।

स्कन्दगुप्तस्य भितरीस्तम्भलेखे संस्कृतभाषायां स्कन्दगुप्तस्य वंशप्रशस्तिः, राजवृत्तं, दानवृत्तिश्च इत्येते विषयाः वर्णिताः। अतोच्यते – **महाराजश्रीघटोत्कटपौत्रस्य महाराधिराजश्रीचन्द्रगुप्तस्तस्य पुत्रस्य लिच्छिविदौहित्रस्य महादेव्यां कुमारदेव्याम्**[17] **–** अत्र न केवलं स्कन्दगुप्तस्य अपि तु चन्द्रगुप्तस्यापि विस्तृतपरिचयः समुपलभ्यते।

**मंदसौरशिलालेखः**

मध्यप्रदेशस्थः तन्तुवायश्रेणीकः मंदसौरशिलालेखः संस्कृभाषायां 529 वि. सं वत्सभट्टिना लिखितः। पद्यात्मकस्यास्य शिलालेखस्य रचयिता वत्सभट्टिना स्वयमेव स्वीयपरिचयः अनुष्टपछन्दसा विरचिते चतुर्चत्वारिंशत्तमे श्लोके – **पूर्वा चेयं प्रयत्नेन रचिता वत्सभट्टिना।**[18] इति।

अस्मिन् शिलालेखे पञ्चचत्वारिंशच्छोकाः सन्ति। तेषु अधिकाः वसन्ततिलकम् इति छन्दसा विरचिताः। वसन्ततिलकस्य लक्षणं हि – **ज्येयं वसन्ततिलकं तभजाजगौगः**[19] इति। यथा –

**कान्तो युवा रणपटुर्विंयान्वितश्च राजापि सन्नुपसृतो न मदैः स्मयाद्यैः।**

**शृङ्गार-मूर्त्तिरभिभात्यनलंकृतोऽपि रूपेण कुसुमचाप इव द्वितीयः।।**[20]

श्लोकेऽस्मिन् उपालङ्कारः दृश्यते। राजा विश्ववर्मणः कीर्तिप्रकटनकाले अयं श्लोकः रचितः।

**प्रभवतीगुप्तायाः पुनाताम्रपत्रलेखः**

प्रभवतीगुप्तायाः पुनाताम्रपत्रलेखे संस्कृतभाषायां गुप्तवंशावलिः, प्रशासनिकः निर्देशश्च इत्यादयः विषयाः गद्यशैल्यां सात्त्वतीवृत्या लिखिताः वर्तन्ते। अस्य ताम्रपत्रलेखस्यैव मूलपाठे - **वाकाटकललामस्य क्रमप्राप्तनृपाश्रयः जनन्या युवराजस्य शासनं रिपुशासनम्।।**[21]

**तोरमाणस्य एरण-अभिलेखः**

---

16 इन्दौरताम्रपत्राभिलेखः – श्लोकः – 1

17 भितरीस्तम्भलेखः

18 मन्दसौरशिलालेखः – श्लोकः – 44

19 छन्द. म – द्वितीयः स्तवकः – पृ – 59

20 मन्दसौरशिलालेखः – श्लोक– 27

21 प्रभावतीगुप्तायाः ताम्रपत्रलेखः

तोरमाणस्य एरण-अभिलेखस्य विषयो भवति राजप्रशस्ति। शिलालेखे तस्य नामोच्चारणमपि दृश्यते - **महाराजाधिराज श्री तोरमाणे प्रशासति।**[22] संस्कृतभाषायां विरचित: अयं शिलालेख: गद्यपद्यमिश्रित:। यद्यप्यस्मिन् शिलालेखे लेखनशैली अत्यन्तसरला अर्थात् सात्त्वतीवृत्ति: एवं प्रसादगुणान्वता। प्रसादगुणस्य लक्षणं हि -**व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थिति:**[23] इति। अर्थात् शैथिल्यं प्रसादगुणयुत: इति।

**अफसद्-शिलालेख:**

आदित्यसेनस्य अफसद्-शिलालेख: 662 ई लिखित:। अस्य शिलालेखस्य विषय: मागधगुप्तशासकेतिहास:। संस्कृतभाषायं श्लोकाकारेण अयं शिलालेख: लिखित: वर्तते। साकल्येन त्रिंशाच्छलोका: सन्ति। यद्यपि छन्दस्यापि वैविध्यमपि दरीदृश्यते किन्तु आर्याछन्दसि एवं उपजातिछन्दसि विरचिता: श्लोका: अधिका:। यथा -

**सकल: कलङ्करहित: क्षततिमिरस्तोयधे शशङ्क इव।**

**तस्मादुदपादि सुतो देव: श्रीहर्षगुप्त इति॥**[24]

**हडहाऽभिलेख:**

ईशानवर्मन: हडहाऽभिलेखे मौखरीराजवंशस्य इतिहास:, भगवत: क्षेमेश्वरस्य मन्दिरस्य पुनर्निमाणश्च इत्यादय: विषयो वर्तते। त्रयविंशतिश्लोकात्मक: अयं शिलालेख:। मौखरीराजवंशस्य इतिहासकथनवेलायां उच्यते -

**लोकाविष्कृतिसंक्षयस्थितिकृतां य: कारणं वेधसाम्**

**ध्वस्तध्वान्तचया: परास्तरजसो ध्यायन्ति यं योगिन:।**

**यस्यार्द्धस्थितयोषितोपि हृदये ना स्थायि चेतोभुवा**

**भूतात्मा त्रिपुरान्तक स जयति श्रेय: प्रसूतिर्भव:॥** [25]

श्रेय: प्रसूति भूतात्मा त्रिपुरान्तक लोकाविष्कृतिसंक्षयस्थितां य: कारणं वेधसाम् ध्वस्तध्वान्तचया: परस्तरजसो यं योगिन: ध्यायन्ति, यस्य अर्धस्थितयोषितोपि चेतोभुवा हृदये न स्थायि, स भव: अर्थात् शिव: जयति। अस्मिन् श्लोके **शार्दुलविक्रिडितछन्द:**। तस्य लक्षणं हि - **सूर्याश्वैर्मसजस्तता: सगुरव: शार्दूलविक्रीडितम्।**[26]

**बांसखेडा ताम्रपत्राभिलेख:**

हर्षस्य बांसखेडा ताम्रपत्राभिलेख: स्वयमेव विशिष्टतां वहति। अस्मिन् शिलालेखे राजाहर्षवर्धनस्य हस्ताक्षरं लभते। दीर्घसमासबद्धवाक्येन संस्कृतभाषायां हर्षस्य वंशपरिचयान्वित: अयं शिलालेख:। तस्य मूलपाठ एवं दृश्यते -

**श्रीस्वस्ति महानौहस्त्यश्वजयस्कंधावाराच्छ्रीवर्द्धमानकोट्या महाराजश्रीनरवर्द्धनस्तस्य पुत्रस्त्पादानुध्यातश्श्रीवजिणी देव्यामुत्पन्न परमादित्यभक्तो महाराजश्रीराज्यवर्द्धनस्तस्य पुत्रस्तत्पादुनु**[27]**-**

---

22 एरण- अभिलेख:

23 का. प्र. - अष्ट. उ, पृ. - 477

24 अफसदशिलालेख: श्लोक: - 2

25 हडहाऽभिलेख: - श्लोक - 1

26 छन्द. म - द्वितीय: स्तवक: - पृ 89

अस्मिन् शिलालेखे सात्त्वतीवृत्तिः दृश्यते। तस्य लक्षणं हि – **सात्त्वती बहुला सत्त्वशौर्यत्यागदयार्जवैः** [28] दीर्घसमासवद्धत्वात् ओजगुणान्वितश्च। ओजगुणस्य लक्षणं हि – **गाढवन्धत्वमोजः**[29] इति।

### पुलकेशिन्द्वतीयस्यैहोलशिलालेखः

पुलकेशिन्द्वतीयस्यैहोलशिलालेखे 634 ई. संस्कृतभाषायां पुलकेशिन्द्वितीयस्य राजप्रशस्तिविषये लिखितं वर्तते। अस्मिन् शिलालेखे सप्तत्रिंशत् विविधछन्दसमन्वितश्लोकाः सन्ति। रविकीर्तिना विरचिते मूलपाठे पुलकेशिन्द्वितीयस्य प्रशस्तिः एवं वर्तते –

**जयति भगवाञ्जिनेन्द्रो वीतजरामरणजन्मनो यस्य।**

**ज्ञान-समुद्रान्तर्गतमखिलं जगदन्तरीपमिव॥**[30]

एतावता ई.पू 270 आरभ्यः 634 ई. पर्यन्तं बहुप्रसिद्धाभिलेखविषये चर्चितः। एतेषाम् अभिलेखानां न केवलं ऐतिहासिकदृष्ट्य वा भौगलिकदृष्ट्या पर्यालोचनं सम्भवति अपि तु काव्यतत्त्वदृष्ट्यापि यथासाध्यं संक्षेपेन अस्मिन् शोधलेखे पर्यालोचितम्। एतेषु गद्यात्मकेष्वभिलेखेषु का रचनशैली, गुणः रसः इति पर्यालोचितः, अपि श्लोकात्मकेष्वभिलेखे अलङ्कारादिरपि चर्चितः यच्च जिज्ञासुनां कृते महदुपकाराय भवतीति शम्।

### संकेताक्षरसूची

1. छन्द. म. – छन्दमञ्जरी
2. का. प्र – काव्यप्रकाशः
3. सा. द – साहित्यदर्पणः

### परिशीलितग्रन्थसूची


1. महाभाष्यम्, महर्षिपतञ्जलिः, व्याख्याकारः – प्रो. जयशङ्करलालत्रिपाठी, कृष्णदास अकादमी, वाराणसी – 221001
2. साहित्यदर्पणः, विश्वनाथकविराजः, सम्पा. आचार्यलोकमणिदाहालः, चौखम्बा सुरभारती प्रकाशन, वाराणसी – 221001
3. उपकार यू.जी.सी. नेट/ जे. आर. एफ./सेट् संस्कृत, मिथिलेश पाण्डेयः, उपकार प्रकाशन, आगरा – 2
4. काव्यप्रकाशः, मम्मटार्यः, सम्पादकः नारायणदासः वह्लतिः, 1917 ख्री., मुम्बाई
5. छन्दमञ्जरी, वैद्यश्रीगङ्गादससूरि, टीकाकारः रामतारणशिरोमणि, 1891ख्री कलिकाता


---

27 बांसखेडा ताम्रपत्राभिलेखः

28 सा.द – षष्ठ. प. – पृ –594

29 का.प्र – अष्ट. उ, पृ. – 475

30 ऐहोलशिलालेखः